CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ॐ श्रीगणेशाय नमः अथ विवाहपद्धति लिख्यते ततो वि-
वाहलग्नात्कीर्तिपर्यावशिष्टाद्दिवसे शुभलग्ने विवाहोक्त-
क्षेत्रे संस्कार्य्यपुत्रस्य संस्कार्य्या कन्यायाश्च पिता पत्नीभिः स-
ह कृताभ्यंगस्नानः अहतवासाः शुभासने प्राङ्मुख उपवि-
श्याचम्य कन्यापिता वरपिता च सर्वारंभनिमित्तं गणेशपूजनं
कुर्यात् अर्घ्यं संस्थाप्य पूजासंकल्पः अद्येहेत्यादि अमुक
गोत्रोऽमुकशर्माहं अमुकराशेः कन्याया विवाहकर्मणः स-
र्वारंभकर्मणि निर्विघ्नप्राप्तये गणेशस्य पूजनं करिष्ये इति
संकल्प्य गणेशं संपूज्य वस्त्रसीवनपक्वान्नादिकरणं कु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰

य्यात ततो विवाहात्पूर्वदिने तद्दिनेवा कन्यापिता पूर्वं ग[illegible]म्मे
कुर्य्यात आदौ गणेशं संपूज्य प्रधान संकल्पं कुर्य्यात [illegible]
हित्या देशकालौ संकीर्त्य ऽमुकगोत्रोऽमुकशर्माहं [illegible]मुकं
राशेः अस्याः कन्यायाः वीजगर्भसमुद्भवदुरितक्षयपूर्वक [illegible]स
हधर्म्मप्रजोत्पादनद्वयपरिग्रहेष्वधिकारसिद्धिद्वारा श्रीपरमे
श्वरप्रीत्यर्थं विवाहाख्यं संस्कारं करिष्ये इति संकल्पः [illegible]
पूजा नांदीश्राद्ध पुण्याहादिकं कृत्वा कलशे नवग्रह पूजनं
विधाय लेख्य गौरीहरयोर्म्मूर्त्तिं लिखित्वा कन्या हस्तेन पू[illegible]
नं अर्घसंस्थाप्य पूजनसंकल्पः अद्येहामुकगोत्रा[illegible]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

करांशिरसुकेदेव्यहंसकलसौभाग्यसंमृद्ध्ये लक्ष्मीगौ
रीहरयोः पूजनंकरिष्ये एतंतेदेवसवितःइतिप्रतिष्ठा
ॐ भूर्भुवःस्वः लक्ष्मीगौरीहरौसुप्रतिष्ठितौवरदौभवतां
अथध्यानं सिंहासनस्थांदेवेशींसर्वालंकारभूषितां पी
तांबरधरंदेवंचंद्रार्द्धकृतशेखरं करेणाधःसुधापूर्णक
लशंदक्षिणेनतु वरदंचाभयंवामेनाश्लिष्यचतनुप्रियां
एवंध्यात्वापूजयेन्मंत्रैःपुराणभाजस्तथास्त्रियः पूजामंत्रः
गौरीहरमहेशानसर्वमंगलदायक पूजांगृहाणदेवेशस
र्वदामंगलंकुरु इतिमंत्रेणपाद्यादिभिःसंपूज्य कन्यादे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हप्रमाणेनसप्तविंशतितंतुभिः वर्त्तिकांदीपयेत्यस्याद्धृत
वि॰प॰ २ संपत्तिहेतवे एवंवर्त्तिकांकृत्वानीराजनंविधायभोज
नीयब्राह्मणाश्चस्तुवासिन्यः सुपूजितादृशाष्टपंचयुग्मे
वाहरणेपनाथतोषयेत् अत्रकात्यायनीमहालक्ष्मी
रपिनाम्नैणपूजनंकार्यं इतिकन्यापक्षविधिः अथव
रपक्षविधानं अथवरपिताशुभेविवाहात्पूर्वदिनेतद्दिने
वापूर्वांगंकुर्यात् प्रथमेगणेशपूजनंकार्य्यं आचम्यार्घं
संस्थाप्य पूजासंकल्पः अद्येहामुकोऽहंअमुकराशिपुत्र रा॰म॰ २
स्यकरिष्यमाणविवाहकर्म्मणःपूर्वांगकर्म्माणिनिर्विघ्न

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तासिद्ध्यै गणेशस्य पूजनं करिष्ये इति गणेशं संपूज्य प्रधा
न संकल्पः अद्येहेत्यादिदेशकालौ स्मृत्वाऽमुकगोत्रो
ऽमुकशर्म्माहं ऽमुकराशेः ऽमुकशर्म्मणः पुत्रस्य देवपितॄणां
पाककरणहेतु धर्म्मप्रजोत्पादनसिद्धिद्वारा श्रीपरमेश्वर
प्रीतये विवाहाख्यसंस्कारं करिष्ये तत्पूर्वांगत्वेन मातृपूजा
नान्दीश्राद्धपुण्याहवाचनकलशस्थापनग्रहपूजनानि क
रिष्ये इति संकल्पः मातृपूजानान्दीश्राद्धपुण्याहवाचन
कलशस्थापननवग्रहपूजनं च विधाय वरहस्ते वरमातृ
हस्तेन कंकणबंधनं विधाय सर्वां विवाहसामग्रीं गृही

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लाविवाहपुत्रं मुकुटकंकणभूषणकौसुंभरंजितवस्त्रा
क्रि.प. ३ दिभूषितंकृत्वा मंगलतूर्य्यघोषेणकौसुंभपालाशपु
ष्परंजितवस्त्रादिभूषितावरपक्षिणः वरसहिताःकन्यापि
तृगृहंगच्छेयुः कन्यापितावरशिविकादियानेस्वगृहस
मीपेवास्य वरंयानादुत्तार्य्यपादौप्रक्षाल्यस्वयमुदङ्मु
खआचार्य्यसहितंवरंस्वस्तिकादिचर्चितेदेशेपित्तलकुं
डिकायांवरस्यपादौप्रक्षाल्य तज्जलंशिरसिचाभिषि
च्य यज्ञीयकाष्ठनिर्म्मितचतुष्पादपीठासनेनिवेशयि
त्वा वरपूजांकार्य्या आचम्य गणेशंनमस्कृत्य अर्घसं रामः २

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्थापनं कुर्य्यात् प्रथमं वाग्दानं विधाय तत्र संकल्पः
अद्येहेत्यादि अमुकशर्म्माहं करिष्यमाणकन्यादानोगत्वे
नवराय वाग्दानं करिष्ये ततः कुंकुमाक्तानि पंचफलान्या
दाय अमुकगोत्रोऽमुकप्रवरोमुकवेदांतशाखाध्यायी
अमुकशर्म्माहं अमुकगोत्रोत्पन्नस्यऽमुकप्रवरस्यऽमुक
वेदाध्यायिनःऽमुकशर्म्मणः प्रपौत्रायऽमुकशर्म्मणः पौ
त्रायऽमुकशर्म्मणः पुत्राय ऽमुकनाम्ने विष्णुस्वरूपिणे
कन्यार्थिने वराय अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्यऽ
मुकवेदाध्यायिनः अमुकशर्म्मणः प्रपौत्री अमुकशर्म्म

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

णः पौत्री अमुकशर्म्मणः पुत्री अमुकनाम्नी श्रीरूपिणी व
वि॰ ४ रार्थिनी कन्यां ज्योतिर्विदादिष्टे मुहूर्त्ते तुभ्यं दास्ये तत्प्र
तिग्रहार्थं एभिर्गन्धाक्षतपुष्पफलद्रव्यभूषणाद्युपचा
रैस्त्वामहं वृणे इति वरं वृत्वा वाग्दानं कृत्वा अथ द्वारागत
वरपूजा आचम्य अर्घस्थापनं कृत्वा प्राणायामं विधाय
संकल्पः अद्येह देशकालौ संकीर्त्य ऽमुकगोत्रो ऽमुकरा
शिरमुकशर्म्माहं करिष्यमाणकन्यादानप्रतिग्रहार्थं द्वा
रदेशागतस्य वरस्य पूजनपूर्वकं वरणं करिष्ये तस्य पूर्वां रामः ४
गत्वेन वरकन्ययोः पाणिग्रहणकर्म्मणि आचार्य्यकर्म्म

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्तुं आचार्यस्य पूजनं वरणं च करिष्ये इति संकल्पः मू
भि देवायजन्मासि त्वं विप्रपुरुषोत्तम प्रत्यक्षोयज्ञपुरुष
अर्घं मे प्रतिगृह्यतां इति मंत्रेणाचार्यायार्घं दत्वा गंधा
क्षतपुष्पैः संपूज्य एभिर्गंधाक्षतपुष्पमालायज्ञोपवीतपुंगी
फलद्रव्यवासोलंकरणैः वरकन्ययोः करिष्यमाणविवाह
कर्म्मणि आचार्यकर्म्मकर्तुं आचार्यत्वेन त्वामहं वृणे
वृतोस्मीति प्रत्युक्तिः ततः आचार्यायऽर्घं दद्यात् ॐ अ
र्घोऽर्घोऽर्घः प्रतिगृह्यतां इत्यर्घं दद्यात् ततश्चाचार्यप्रमु
खाः पठंति ॐ अथवरं वृणीते वलवद्धवै देवा एतयहस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰ ५

होमे प्रशंसंतितेतस्माद्ध्वरं हराीते अथवाराध्यउपानहा
उपमुंचतेसग्नोहवेदेवाघृतकुंभंप्रवेशयांचक्रुः ततोवरा
हसंवभूव तस्माद्वाराहोमेदुरोघृतोंघ्रीसंवभूव तस्माद्वा
राहगावःसंजननतेस्वमेवैतद्रसमाभिसंजनते तत्पारंनी
यतेप्रतिष्ठति तस्माद्वाराह्याउपानहा उपमुंचतेस आज
गामगोतमोवभूवारणस्पजैवलेरासतस्मादासनमाहार्य्या
दकमहारयांचकाराथास्माकमर्घंचकार सहोवाचवरंव
दति गोतमायदन्वहृतिसहोवाचप्रतिज्ञायते मयैषप्र रामः
तियांतुकुमारस्यांतेवाचमभाषततांमेब्रूहीतिसहोवाच ५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विज्ञायतेहास्तिहिरण्यस्य पार्श्वे गोश्वानादासदासीनांप
रिवाराणां परिधानानांमातोमहान्य र्थ्यन्तस्यामवधान्यो न्
यासथुं सवैगोत्तमतीर्थेनेक्षामहसुपस्नेहं भवंतमित्विवा
चाहमस्मै पूर्वमुपनयंतिसहोपायनकीर्त्या उवाचवाचा
लवाचः इतिपठित्वा चागतोसिवरश्रेष्ठ धर्म्मकामार्थसि
द्धये प्रतिग्रहसमर्थोसि· त्र्यर्घंग्र[illegible] हनमोऽस्तुते चापः
स्तीरंकुशाग्राणिदध्याविरततंडुलैः यवैःसिद्धार्थकैश्चै
वअष्टांगोर्घःप्रकीर्तितः ॐअर्घोऽर्घोऽर्घःप्रतिग्रह्यतां
वरःप्रतिग्रह्णामि· इतिप्रतिग्रह्य ॐ ग्रसोयस्त्तान्त्राऽरुण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰ उतवम्भूस्तमंगलं यचैनॐरुद्राअभितोदिक्षुश्रिताःसह
६ स्त्रशोवैषांॐहेडईमहे ओंअसौयोवसर्पतिनीलग्रीवाविं
लोहित उत्तैनंगोपा अदृश्रनदृशन्नुदहार्य्य सदृष्टोमृड
याति नः २ नाभौहस्ते प्रदातव्यंस्कंधेशिरसिपादयोः जा
नुभ्यामुदरे चैवमष्टांगोर्घःप्रकीर्तितः अष्टांगैर्र्घ्यंदत्वा गंध
द्वाराभितिगंधं नमोस्त्वनंतायेति॰ अक्षतपुष्पैर्वरंसंपूज्य
वरांसामग्रींगृहीत्वा एभिर्गंधाक्षतपुष्पद्रव्यपयज्ञोपवीत
पुष्पमालाकंचुकोष्णीयादिवासःकर्णभूषणाकरभूषणा
दिभिः अनयावरमुद्रिकयाचकन्यादानंप्रतिग्रहार्थं अमु रामः ६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कगोत्रं अमुकप्रवरंऽमुकवेदशाखाध्यायिनं अमुकशर्माणं
वरत्वेन त्वामहं वृणे वृतोस्मीति वरो वदेत् ततो वरणाय यज्ञोप
वीत पूर्वकमालाकर्णभूषणांगमुद्रिकाधारणं कृत्वा अभि
षकं तिलकं च कृत्वा मंत्रपाठः ॐ अग्नये त्वा मह्यं वरुणो
ददातु सोमृतत्वमशीय प्राणो दात्रे वयोधि मह्यं प्रतिदहित्रे
रुद्राय त्वा मह्यं वरुणो ददातु सोमृतत्वमशीयायुर्दात्रे वयो
धि मह्यो मह्यं प्रतिग्रहीत्रे बृहस्पतये त्वा मह्यं वरुणो ददा
तु सोमृतत्वमशीयधि ग्दात्रे वयोधि मयो मह्यं प्रतिग्रहीत्रे
यमाय त्वा मह्यं वरुणो ददातु सोममृतत्वमशीय हयो दा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰ ७

त्वयेधिमयोमह्यंप्रतिगृहीते यमायत्वामह्यंवरुणोद
दातु सोमृतत्वमशीय हयोदात्वेयधिमयोमह्यंप्रतिगृही
ते ॐ कोदात कस्मा अदात्कामोदात्कामायादात्कामोदा
ताकामः प्रतिगृहीता कामैतत्ते इति मंत्रपाठं कृत्वा कन्या
पित्रे दद्यात् ततो वत्स्यादिभिर्वा नीराजनं कुर्यात् इति दे
शाचारः इति धूल्यर्घविधिः ततो वाद्यपुरस्सरं स्वस्तिवा
चनं पठन् विवाहशालायां गच्छेत् प्रथमाचार्य्यवरयोस्ति
लकं विधाय ततः प्राङ्मुखं वरं पश्चिमामुखीं कन्यां स्वयं
दाता उदङ्मुखो भूत्वा सर्वां विवाहसामग्रीं यथास्वमनमा

रामः ७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साद्यरक्तकंवलादिभिरलंकृत्वा शुभासनेउपविश्या
चम्य अर्घस्थापनंकृत्वा प्राणायामंविधाय संकल्पः अ
द्येहेत्यादिदेशकालौसंकीर्त्यऽमुकगोत्रोमुकराशिरमुकश
र्म्माहंकन्यादानप्रतिग्रहार्थंगृहागतंस्नातकंवरं मधुपर्केण
र्चयिष्ये यथावरोपिअर्घस्थापनंविधायसंकल्पंकुर्य्यात्
अद्येहामुकराशिरमुकशर्म्माहंधर्म्मप्रजाहेत्वर्थंयजुःशा
खोक्तविधिनाविवाहकर्म्माहंकरिष्ये इतिसंकल्पः मधुप
र्कविधिस्तुवरशाखोक्तःकार्य्यः तत्रपारास्करसूत्रम् षड
र्घ्याभवंत्याचार्य्यऋत्विक्वैवाह्योराजाप्रियस्नातकइति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि.प.
८

प्रतिसंवत्सरानर्हयेयुः अथयजमानः पीठमासनमाहार्य्या
ह साधुभवानास्तामर्चयिष्यामोभवंतमर्चयेतिवरस्यो
क्तिःपाद्यादार्स्याशिरःप्रतिस्त्व्यतां वरःप्रतिगृह्णामीत्युक्ता
एकंविष्टरमादायाह वर्ष्मोस्मीत्याथर्वणऋषिरनुष्टुप्छंदः
विष्टरोदेवताउपवेशनेविनियोगः ओंवर्ष्मोस्मिसमानानामु
द्यतामिवसूर्य्यः इमंतमभितिष्ठामियोमाकश्चाभिदा
सति इतिमंत्रंपठित्वा विष्टरेउपविशति ततःपाद्यं३
प्रतिगृह्यतां अहंप्रतिगृह्णामीतिवरःप्रतिगृह्य तत्पात्रं
भूमौनिधाय अंजलिनाजलमादायदक्षिणंपादंप्रक्षाल

राम:
८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यति मंत्रः विराजोदोह इतिप्रजापतिर्ऋषिर्यजुश्छंदः आपो
देवता दक्षिणपादप्रक्षालने विनियोगः ॐ विराजोदोहमसि
विराजोदोहमसीय मयिपाद्यै विराजोदोहमसि अनेनवाम
पादं प्रक्षालयेत् क्षत्रियादीनां वामपादं प्रथमे ततो द्वितीयं
विष्टरं कलशद्रव्यं दत्वा दद्यात् संकल्पः अद्येह अमुकश
र्म्माहं आदित्यादिनवग्रहाणां प्रीतये इदं सुवर्णादिकलश
द्रव्यं कन्यापक्षीयब्राह्मणाय दास्ये तत्सत् इतिद्रव्यं दत्वा द्वि
तीयं विष्टरं दद्यात् विष्टरो प्रतिगृह्यतां अहं प्रतिगृह्णामि
पूर्ववद्वर्ष्मोस्मीति मंत्रं पठित्वोपविशयेत् पादयोरधस्तात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निदध्यात् ततोयजमानः अर्घोऽर्घोऽर्घः प्रतिगृह्यतांवरः
प्रतिगृह्णामीतिप्रतिगृह्य॰ मंत्रः आपस्थेतिप्रजापतिर्ऋषि
र्यजुश्छंदः आपोदेवता अर्घग्रहणे विनियोगः ॐ आपस्थयु
ष्माभिः सर्वान्कामानवाप्नुवानीति मंत्रंपठित्वा अर्घम
भिमंत्रयेत् समुद्रमित्यथर्वण ऋषिरनुष्टुप्छंदः आपोदे
वताऽर्घाभिमंत्रणे विनियोगः ॐ समुद्रंवः प्रहिणोमिस्वां
योनिमभिगच्छत अरिष्टाअस्माकंवीरामापरासेचमत्पयःइति
अथाचमनीयं२ प्रतिगृह्यतां इत्युक्तवरः प्रतिगृह्णामीत्यु
क्त्वाऽऽचमनंकुर्य्यात् मंत्रः आमागन्नेतिपरमेष्ठी ऋषिर्बृह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्पतिश्छंदः आपोदेवता चमनेविनियोगः ॐ आमागमन्य
शासंसृज वर्चसा तमाकुरुप्रियंप्रजानामधिपतिंपशू
नामरिष्टिंतनूनां इतिमंत्रेणासकृदाचम्य स्मार्त्ताचमनंकु
र्यात् अथदधिमधुघृतंकांस्येस्थापितंकांस्यपात्रेणपि
हितंमधुपर्कंवरायनिवेदयेत् ॐमधुपर्कोमधुपर्कोमधुप
र्कः प्रतिगृह्यतां वरः अहंप्रतिगृह्णामीत्युक्त्वा यजमानह
स्ताद्गृहीतंमधुपर्कमीक्षमाणोमंत्रंपठेत् मित्रस्यत्वेतिबृ
हस्पतिऋषिर्यजुःछंदोमधुपर्कोदेवताप्रेक्षणेविनियोगः
ॐ मित्रस्यत्वाचक्षुषासर्वाणिभूतानिसमीक्षंतां मित्रस्यत्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चक्षुषासर्वाणिभूतानिसमीक्षे मित्रस्यत्वा चक्षुषासर्वा
वि.प. णिभूतानिसमीक्षामहे इतिसमीक्ष्य देवस्यत्वेतिबृहस्पति
१० रांगिरसोऋषिर्यजुश्छंदः सवितादेवता मधुपर्कग्रहणेवि
नियोगः ॐ देवस्यत्वा सवितुःप्रसवेश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यां प्रतिगृह्णामि इतिप्रतिगृह्य सव्यपाणौनिधाय
दक्षिणस्यानामिकयात्रिःप्रयौतित्रिवारंमिश्रयति मंत्रः
नमःश्यावेतिप्रजापतिऋषिर्यजुःछंदःसवितादेवताम
धुपर्कनिरूक्षणेविनियोगः ॐनमःश्यावास्यायान्नश
नेयत्तआविद्धंतत्तेनिष्कृतामि इतिसकृदालोड्य त्र्यंगु राम:

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ष्ठानामिकाभ्यां त्रिवारं निरूक्षणं कृत्वा त्रिः प्राश्नाति यन्म
धुन इति कुत्स ऋषिर्जगतीछंदो मधुपर्को देवता प्राशने वि
नियोगः ॐ यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यं तेनाहं म
धुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादो स
नीति इति मंत्रेण द्विवारं मधुपर्कप्राशनं मधुवाता ऋतायत
ते इत्यृचापि प्राशनं कृत्वा शेषं पुत्राशिष्याय वोत्तरतत्रासि
नाय वोच्छिष्टं दद्यात् सर्वं वा प्राश्नीयात् असंचरे वा प्रक्षिपे
त् आचम्य प्राणान्संस्पृशेत् संहताभिस्तिसृभिरंगुलीभि
र्मध्यमानामिकाभ्यां अक्ष्णोर्मे चक्षुरस्त्विति नासिकारंध्रे

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰ २२

अंगुष्ठप्रदेशनीभ्यां अनामिकाभ्यां अक्ष्णोर्मेचक्षुरस्त्वी
ति चक्षुषी कर्णयोर्मेश्रोत्रमस्त्विति कर्णौ वाह्वोर्मेवल
मस्त्विति युगपद्वाहू ऊर्वोर्मेओजोस्त्विति ऊर्वोः अरिष्टा
निमेंगानिसंतु तनूस्तन्वामेसहेति शिरःप्रभृतिपादांतं
आलभेत ततोद्विराचमनंकृत्वा यजमानःखड्गमादाय
गौः गौ गौरितित्रिराह नालभ्यतामितिवदेत मातेतिब्रह्मा
ऋषिर्यजुश्छंदोगौर्देवतागोरभिमंत्रणेविनियोगः ॐमा
तारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः
प्रणुवोचंचिकितुषेजनाय मागामनागामदितिंमावधिष्ट

रा॰म॰ २२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ममचामुष्यशर्म्मणोयजमानस्यचोभयोःपाप्मानंहत
उत्सृजततृणान्यत्तु इतिपठित्वा कुशपत्रस्योत्सर्गएवंना
लंभनंचोटनेनकुर्यात् गोरालंभनमितित्तद्दक्षिणासंक
ल्पः अद्येहामुकशर्म्माहंमधुपर्कोत्सर्ज्जनकर्म्मणःसाङ्ग
ण्पार्थं इमांदक्षिणामाचार्य्यायदास्ये उभयपक्षादक्षिणा
संकल्प्यदद्यात् अस्मिन्नवसरेवरपक्षीयःकश्चिद्ब्राह्मणो
वहिःशालायामागत्यवेदीकृत्वा पंचभूसंस्कारपूर्वकम
ग्निसंस्थापयेत् अग्निस्थापनानंतरंकन्यावस्त्रपरिधान
मंत्रः जरांगच्छेतिप्रजापतिर्ऋषिस्त्रिष्टुप्छंदःवासोद्व

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यांकन्यावस्त्रपरिधानेविनियोगः ॐजरांगच्छपरिधत्स्व
वि.प वासोभवाकृष्टीनामभिशस्तिपावाशतंचजीवाशरदः
१२ पुरुचीरायस्पोषमभिसंव्ययस्वायुष्मतीदंपरिधत्स्ववा
सः यात्र्यकृंतन्निति प्रजापतिऋषिस्त्रिष्टुप्छंदोवासो
देवता उत्तरीयपरिधानेविनियोगः यात्र्यकृंतन्नवयंया
तन्वतयाश्चदेव्यस्तंतूनभितोततंथतास्त्वादेविजरसेसंव्य
यस्वायुष्मतीदंपरिधत्स्ववासः अथर्वःस्वयंपरिधत्तेप
रिधास्यतीतिअथर्वणऋषिःपंक्तिछंदःवासोदेवतावस्त्रप रामः
रिधानेविनियोगः ॐपरिधास्यैयशोधास्यैदीर्घायुत्वाय १२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रद्दष्टिरद्दष्टिरश्मिः शतंचजीव्यामिशरदःसुवर्च्चारायस्पो
षमभिसंव्ययिष्ये अथोत्तरीयं ॐयशसामाद्यावापृथि
वीयशसेंद्रायबृहस्पतिर्यशोभगश्च माविंद्याद्यशोमाप्र
तिपद्यतां ततआचम्य अथकन्यापितापरस्परंसमंजे
थामितिकन्यावरौसन्मुखौकुर्य्यात ॐसमञ्जंतुविश्वेदे
वासमापोहृदयानिनौसंमातरिश्वासंधातासमुदेष्टीद
धातुनौ इतिपठित्वा अथवंशगोत्रप्रवरनिश्चयार्थंगो
त्रोच्चारः कर्त्तव्यः तत्क्रममाह कारिकाकारः उच्चारःप्रति
लोमेनपितॄणांसर्वकर्म्मसु कन्यादानेनयज्ञेषुचावतु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰ लोमेनसंस्मृतः तत्रपूर्वकन्यापत्नियोब्राह्मणआशीर्वाद
१२ श्लोकंपठेत् जेतुंयस्त्रिपुरंहरेणहरिणाव्याजाद्बलिंव
ध्नतास्त्रष्टुंवारिभवोद्भवेनभुवनंशेषेणधर्त्तुंधरां पार्व
त्यामहिषासुरप्रमथनेसिद्धादिभिर्मुक्तयेध्यातःपंचशर
णविश्वविजयेनागाननःपातुवः तत्रेत्थंवाक्यं किंगो
त्रस्यकिंप्रवरस्यकिंशाखिनःकिंवेदाध्यायिनःकिंशर्म्म
णःप्रपौत्राय किंगोत्रस्यकिंप्रवरस्यकिंशाखिनःकिंवे
दाध्यायिनःकिंशर्म्मणःपौत्राय किंगोत्रस्यकिंप्रवर रामः
स्यकिंशाखिनःकिंवेदाध्यायिनःकिंशर्म्मणःपुत्राय त्रि १३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुष्मतेकन्यार्थिनेविष्णुरूपिणेपरिणाकिनाम्नेवरायअथ
वरपक्षीयोब्राह्मणोपठेत मातस्तातजटास्तुकिंस्तुरसीर
लिकेशेषेरचंद्रमाभालेकिंहुतभुक्कलुठत्परीसीकिंनागाधि
पःकिंकटौ कृत्तिःकिंजघनद्वयांतरगतंकिंदीर्घमालंवत
कृत्वापुत्रवचोविकास्मितमुखीलज्जाननापातुवः २ अ
मुकगोत्रस्यअमुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्या
यिनः अमुकशर्म्मणःप्रपौत्राय अमुकगोत्रस्यअमुक
प्रवरस्यअमुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्म्म
णःपौत्राय अमुकगोत्रादेरमुकशर्म्मणःपुत्राय अमुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰ २४

नाम्नेविष्णुस्वरूपिणेकन्यार्थिनेवराय किंगोत्रस्य
किंप्रवरस्याकिंशाखिनःकिंवेदाध्यायिनः किंशर्म्मणः
प्रपौत्री किंगोत्रस्यकिंप्रवरस्यकिंशाखिनःकिंवेदाध्या
यिनःकिंशर्म्मणःपौत्री किंगोत्रस्यकिंप्रवरस्यकिंशाखि
नःकिंवेदाध्यायिनःकिंशर्म्मणःपुत्री आयुष्मतीवरार्थि
नीश्रीरूपिणीकिंनाम्नीकन्या कन्यापक्षीयःपठेत्‌ जान
क्याःकमलामलांजलिपुटेयापद्मरागायतान्यस्ताराघ
वमस्तकेपरिलसत्कुंदप्रसूनायता स्रस्ताःश्यामलकाय
कांतिनिकरेयास्त्विंद्रनीलायतामुक्तास्तासफलाभवंतु रामः

२४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवतां श्रीरामवैवाहिकाः ३ अमुकगोत्रस्याऽमुकप्रवरस्य
ऽमुकशाखिनःऽमुकवेदाध्यायिनःऽमुकशर्म्मणः प्रपौ
त्री ऽमुकगोत्रस्यऽमुकप्रवरस्यऽमुकशाखिनोमुकवेदाध्या
यिनोऽमुकशर्म्मणःपौत्री अमुकगोत्रस्यामुकशाखिनोऽ
मुकप्रवरस्यामुकवेदाध्यायिनोमुकशर्म्मणःपुत्री आयु
ष्मती वरार्थिनी श्रीरूपिणी अमुकनाम्नीकन्या किंगोत्र
स्यकिंप्रवरस्यकिंशाखिनःकिंवेदाध्यायिनःकिंशर्म्मणः
प्रपौत्रायकिंशर्म्मणःपौत्रायकिंशर्म्मणःपुत्राय आयुष्म
ती श्रीरूपिणीकन्यार्थिनेऽमुकनाम्नेवरायवरपक्षीयः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰
१५

पठेत् रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा
मभ्यर्णे परिरभ्य निर्भरमुरः प्रेमांधया राधया साधुत्वद्वदनं
सुधामयमिति व्याहृत्य गीतस्तुतिव्याजालिंगनचुंबितः
स्मितमनोहारी हरिः पातु वः अमुकगोत्रस्यामुकप्रवरस्या
मुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्म्मणः प्रपौत्रा
य॰ ऽमुकगो॰ ऽमु॰ प्रव॰ ऽमु॰ शा॰ ऽमुकवे॰ ऽमुकशर्म्मणः पौ
त्राय ऽमुकगोत्र॰ ऽमुकप्रव॰ ऽमुकशा॰ ऽमुकवे॰ ऽमुकश
र्म्मणः पुत्राय कन्यार्थिने विष्णुस्वरूपिणोऽमुकनाम्ने वरा रामः
य॰ किंगोत्रस्य किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः १५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किंशर्म्मणः प्रपौत्री किंगोत्रस्य किंप्रवरस्य किंशाखिनः
किंवेदाध्यायिनः किंशर्म्मणः पौत्रीं किंगोत्रस्य किंप्रवर
स्य किंशाखिनः किंवेदाध्यायिनः किंशर्म्मणः पुत्री वरार्थि
नी श्री रूपिणी किंनाम्नी कन्या एवं क्रमेण त्रिवारं पक्षद्वये
गोत्रोच्चारं कृत्वा पक्षद्वये आशीर्वादश्लोकोपठेत् संनंदं
नं द्विहस्ता हत मुरजरवाहूतकौमारबर्हित्रासान्नासाग्ररं
ध्रं विशति फणिपतौ भोगसंकोचभाजि गंडोड्डीनालि
मालामुखरितककुभस्तांडवे शूलपाणेर्वैनायक्यश्चि
रं वो वदनविधुत यः पांतु चीत्कारवत्यः ५ देवक्यो यस्य श्व

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तिस्त्रिभुवनविदितास्तु रुक्मिणीधर्म्मपत्नीपुत्राः प्रद्युम्नमु
ख्याःसुरनरऽधिनोवाहनःपक्षिराजः द्वंद्वारण्यविहारोब्र
जपुरवनितावल्लभाराधिकाद्याश्चक्रेविख्यातमस्त्वेसजय
तिजगतांस्वस्त्ययेनंदसूनुः ६ कौशल्याजठरालवालज
नितसीतालतालिंगितःसिक्तेपंक्तिरथेनसोदरमहाशा
खाभिसेवर्द्धितः रक्षस्तीव्रनिदाघपाटनपटुःछायाचित्ता
नंदकृद्युष्माकंसविभूतयेऽस्तुभगवान्श्रीरामकल्पद्रुमः
७ इत्याशीर्वादश्लोकान्पठित्वा कन्यापितादद्यानि ३ रामः
त्रिवारंवदेत ततःशाखोच्चारदक्षिणांसंकल्पः अद्येहेत्यां २६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दि अमुकशर्माऽहंकन्यादानांगगोत्रोच्चारकर्मणः सांगफ
लप्राप्तये साद्गुण्यार्थंइमांदक्षिणांब्राह्मणेभ्योविभज्यदातुमु
त्सृजे दक्षिणांदत्वा ततोलग्नेसमागतेकन्यांवस्त्रभूषणा
दिभिर्भूषयित्वागंधाक्षतपुष्पैःपूजयेत तत्रमंत्रः श्रीश्चते
लक्ष्मी॰ अंवेअंबिके॰ समख्येदेव्याधियेतिमंत्रैः संपूज्य लग्न
दानसंकल्पं कन्यापितावरपिताचकुर्यात देशेसुवर्णा
दिद्रव्यंसंप्रोक्ष्यसंपूज्य अद्येहेत्यादि अमुकोऽहंअमु
कराशेःकन्यायाःपुत्रस्यचपाणिग्रहणलग्नातय
चतुर्थस्थितानामादित्यादिनवग्रहाणांदुष्टानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰
८

दुष्टफलोपशांत्यर्थं शुभानांग्रहाणां शुभफलप्रा
प्त्यर्थं नवग्रहाणां प्रीतये इमां सुवर्णादिदक्षिणां ब्राह्म
णाय संप्रददे तत्सत् इति दक्षिणां दत्वा अथ कन्यापिता ति
लकुशयवजलान्यादाय उदङ्मुखः सपत्नीकः कन्यापि
ता प्राङ्मुखोपविष्टायाः कन्याया दक्षिणहस्तांगुष्टं गृही
त्वा कन्यादानसंकल्पं कुर्यात स्त्री च दानपर्यंतं तज्जल
धारां दद्यात अथ संकल्पः ॐ विष्णु २ र्नमः परमात्मने श्री
पुराणपुरुषोत्तमाय तत्सत् श्री हंसस्वरूपिणो
ब्रह्मणोऽनिर्वाच्यमायाशक्तिजृंभिताविद्यायोगकाल

कन्यांगुष्ठं हस्तसहितं गृहीत्वा

रामः
८

CC-0. In Public Domain. Digitization by eGangotri

कर्म्मस्वभावाविर्भूतमहत्तत्वोदिताहंकारतृतीयोद्भूतविय
दादिपंचकेंद्रियनिर्म्मितांडकटाहे चतुर्दशलोकात्मके भूलो
कलीलया तन्मध्यवर्त्तिभगवतः श्रीनारायणस्य नाभिकम
लोद्भूतसकललोकपितामहेन ब्रह्मणा सृष्टिं कुर्वता तद्द्वारेण
यप्रजापतिप्रार्थितेन महापुरुषरूपिणा सितवराहावतारेण
ध्रियमाणायामस्यां भूर्लोकसंज्ञतायां धरित्र्यां सप्तद्वीपमंडि
तायां क्षीराद्यब्धिद्विगुणद्वीपवलयीकृतलक्षयोजनविस्ती
र्णजंबूद्वीपे स्वर्गस्थिताद्यमरगणासितावतारगंगादिसरिद्भूषि
विते भरतखंडे नारिकेलजयावने शौनकादिमुनिकृतनिवासनै

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मिश्रारण्ये आर्य्यावर्त्ते पुण्यक्षेत्रे हिमवत्तत्पर्वतैकदेशे श्रीभ
 गवतोमार्त्तंडस्य पापघ्न कालविनयज्ञगर्गवराहाचार्य्यादि
गणितायां परार्द्धद्विसंख्यायां ब्रह्मणो द्वितीयपरार्द्धस्य द्विती
ययामे तृतीयमुहूर्त्ते श्रीश्वेतवराहनाम्नि प्रथमकल्पे स्वायं
भुवस्वारोचिषौत्तमतामसरैवतचाक्षुषेति षण्मनुनामति
क्रम्यमाणे सम्प्रति सप्तमे वैवस्वतमन्वन्तरे ऽष्टाविंशति कलि
युगस्य प्रथमचरणे श्रीमन्नृपतिविक्रमार्कसमयातीत सं
वत्सराणां समये नातिक्रांतानां षष्ट्यब्दानां मध्ये ऽमुक
नामसंवत्सरे ऽमुकायने ऽमुकऋतौ चामुकमासे ऽमुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पक्षेऽमुकतिथावमुकवासरेऽमुकनामनक्षत्रेऽमुकयोगे
ऽमुकमुहूर्त्तेऽमुकस्थसूर्य्येऽमुकस्थेचंद्रेऽमुकस्थभौमेऽमु
कस्थेबुधेऽमुकस्थेदेवगुरावमुकस्थशुक्रेऽमुकस्थशनौऽमु
कस्थराहौऽमुककेतावेवंगुणविशिष्टायांअस्यांपुण्यतिथौ
ऽमुकगोत्रोऽमुकशर्माहं सपत्नीकोहं अमुकगोत्रस्याऽमुक
प्रवरस्याऽमुकशाखिनोऽमुकवेदाध्यायिनः अमुकशर्म्मणः
प्रपौत्राय अमुकशर्म्मणः पौत्रायऽमुकशर्म्मणः पुत्राय आयु
ष्मतेकन्यार्थिने विष्णुस्वरूपिणेऽमुकनाम्नेवरायऽमुकगो
त्रस्याऽमुकप्रवरस्याऽमुकशाखिनोऽमुकवेदाध्यायिनःऽमुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि.प. २९

शर्म्मणः पुत्रपौत्रीऽमुकशर्म्मणः प्रपौत्रीऽमुकशर्म्मणः पु
त्रीम्मम श्रीरूपिणीं वरार्थिनीं इमां कन्यां यथाशक्त्यलंकृतां
यथाशक्तियौतकयुतां प्रजापतिदैवत्यां पुराणोक्तशतगुणी
कृतज्योतिष्टोमादिसत्रसमफलप्राप्तिकामः ममसमस्तपितॄ
णां निरतिशयानंदब्रह्मलोकावाप्त्यादिकन्यादानविधि
त्रकार्प्पासकौशेयनूतनस्वर्णसूत्रांचितानिनानादिग्दे
शजातानिवज्रक्रयक्रीतानि वज्रमोल्यानिदुकूलोत्तरीयकं
चुकादीरोप्यादिकांस्यपात्रोपरि मंत्रः ॐ यदस्याय वासस्त्व
णाधिवासं हिरण्यपान्यस्मैसंदानं शर्म्मघट्टीशं प्रियादेवेष्वाया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मयेतिभूषणानिसंस्थाप्य मणिमौक्तिकहीरकगारुत्मक
मरकतपुष्परागनीलमहानीलेंद्रवैडूर्यादिमहार्घविवि
धोपलशोभितस्वर्णरचितकरकंकणनूपुरपादांगुलिकर्णवे
रहारग्रैवेयनाशिकेयतिलकटंकस्वर्णपुष्पकंकणकरांगु
लीयककिरीटशिरःपुष्पादीनिविविधस्वर्णमेखलापट्टसू
त्रग्रथितानिनानाभूषणानियादेवतीपुत्रवती मंत्रः रू
पणावोरूपमभ्यागंतुंयावोविश्वेदेवाविभक्तःतस्ययथाप्र
तरंचंडदक्षिणाविश्वपशपर्यंतरिक्षंयतस्वसदस्ये ॐस्वर्णधर्म
स्वाहा ॐ स्वर्णार्कःस्वाहा ॐ स्वर्णशुक्रःस्वाहा स्वर्ण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि.प.
२०

ज्योतिःस्वाहा स्वर्गस्सूर्य्यःस्वाहा यथाशक्तियौतकादिदा
नंदद्यात् ततःकन्यापिताभूयसीदक्षिणासंकल्पंकुर्य्यात्
अद्येहेत्यादिअमुकशर्म्मासपत्नी[illegible]कोहंश्रीलक्ष्मीनारा
यणप्रीतयेकन्यादानकर्म्मणःसांगफलप्राप्तयेसाद्गुण्यार्थ
मिमांभूयसीदक्षिणांनानागोत्रेभ्योदीनानाथेभ्यश्चविभज्य
दास्येतत्समन्नमम तथायथोपपन्नेनान्नेनब्राह्मणांश्चभो
जयिष्ये इतिसंकल्पदक्षिणांदत्वा अभिषेकमंत्रपाठादि
कुर्य्यात् ततःसुवासिनीभिःपुरंध्रीभिःसम्यक्शृंगारादिना
कन्यांभूषयित्वा वरपिताप्रदत्तांकन्यामादायप्रतिग्रहस्था

राम:
२०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नान्निष्क्रामयति मंत्रः यदेषीत्याथर्वणा ऋषिस्त्रिष्टुप् छं
दोलिंगोक्तादेवता कन्यानिष्क्रमणे विनियोगः ॐ यदेषिम
नसादूरं अथयौतकदानवाक्यानि प्रथमं सय्याया अ
नंशयनं नित्यमत्र तन्नो श्रियमुन्नाति सौभाग्यं देहि मे नित्यं
शय्यादानेन केशवः अथसुवर्णांगुलीयकस्य हिरण्यग
र्भसंभूतं पवित्रं चांगुलीयकं सर्वप्रदेप्रदास्यामि प्रीणातु क
मलापतिः कुंडलयोः क्षीरोदमथनाद्दैवैरुद्धृतं कुंडलद्वयं
श्रियासहसमुद्भूतं देहि श्रीः प्रीयतामिति ताम्रपात्रस्य पराप
वादपैशून्यादभक्ष्यस्य च भक्षणात् उत्पन्नं ताम्रदानेन पापं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰ २९

नश्पतितच्चरणात् कांस्यस्थाल्याः यानिपापानिकाम्या
निकामोत्पतिकृतानिचकांस्यपात्रप्रदानेनतानिनश्यंतु
मेसदा अथान्यानि गोमहिष्यादीनि यौतकत्वेनदेयानि
दिशोनुपविमानो हिरण्यपर्णो वैकर्णः सत्यामनसाकरोतु
असौ अमुकीलक्ष्मीतिसंबुध्य तत्कन्यानामग्रहणाति अ
थकन्यापितावरायएनांकन्यांसमीक्षेथामितिप्रैषंदत्वा
वरः समीक्ष्यमाणांकन्यांदृष्ट्वामंत्रानपठेत् अघोरचक्षुरि
त्यादिचतुर्णांमंत्राणांप्रजापतिऋषिस्त्रिष्टुप्छंदः कुमारी रा॰मः
देवतापरस्परसमीक्षणेविनियोगः ॐअघोरचक्षुःपतिघ्न्यै २९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिवायपशुभ्यः सुमनाः सुवर्चा वीरसूर्देवकामास्योनाशन्नोभ
वद्विपदेचतुष्पदे ओंसोमः प्रथमोविविदेगंधर्वोविविदउत्तरः
तृतीयोग्निस्तेपतिस्तुरीयस्तेमनुष्यजाः ओंसोमोददद्गंधर्वाग
धर्वोविविदग्नये रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमां २ सा
नः पूषाशिवतमामैरयसानउशतीविहरयस्यामुशंतः प्रहराम
शेफं यस्यामुकामावहवोनिविष्टचै ८ इतिमंत्रानूपठित्वा कन्या
निष्क्रमणसमयेएकस्मैब्राह्मणायजलपूर्णकुंभंदत्वास्कं
धेधृत्वा मौनेनाभिषेकपर्य्यंतमेशान्यामुदीतिष्ठेत् अथवरः
शालायामागत्याग्नेः पश्चात्तेजनीकटंवादक्षिणपादेनप्रवृत्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰ प॰ २२

ऽयंघ्यप्रदक्षिणामग्निं परीत्य कन्यावरस्य दक्षिणतः उपविश
ति ततः सर्वांविवाहसामग्रींसंपाद्य आचम्य अर्घ्यंस्थाप्य
प्राणायामंकृत्वा वरःप्रधानसंकल्पंकुर्यात् अद्येहदेशका
लौसंकीर्त्य॰ अमुकगोत्रोऽमुकराशिरमुकशर्म्माहंश्रुतिस्मृ
तिपुराणोक्तफलप्राप्त्यर्थंब्रह्मविधिनापितृदत्तामिमांगौरीक
न्यांविवाहयिष्ये तत्पूर्वांगत्वेन विवाहकर्म्मणिब्रह्मकर्म्म
कर्त्तुंब्राह्मणपूजनंवरणंकरिष्ये इतिब्रह्मणेऽर्घ्यंदत्वा॰ गं
धाक्षतपुष्पैःसंपूज्य॰ एभिर्गंधाक्षतपुष्पपुंगीफलद्रव्यवासो रामः
लंकरणादिभिर्वरकन्ययोर्विवाहकर्म्मणिब्रह्मकर्म्मकर्त्तुंब्र २२

CC-0. In Public Domain. Digitization by eGangotri

स्नत्वेनत्वामहंवृणे वृतोस्मीतिप्रत्युक्तिः यथाचतुर्मुखो
ब्रह्मेतिपठित्वाएवमुत्तरासने[redacted] वृतोब्रह्मापूर्वकल्पित
दक्षिणासनेउपविशेत् ततोब्रह्मोपवेशनादिपर्युक्षणां
तेकर्मकुर्यात् प्रणीताप्रोक्षणपात्रासादनान्तेविशेषकल्प
नीयानिवस्तूनि आसादयेत् शमीपालाशमिश्रालाजाः अ
श्मानमखंडलोहितमानुडुहंचर्मतदभावेरक्तवस्त्रं कुमा
रीभ्रातास्थूर्पनवीनंआचार्याःवरद्वयंततःपर्युक्षणांतेकर्म
कृत्वा वरोदेवताभिध्यानंकुर्यात् अग्निविवाहकर्मणाहं
यक्ष्ये तत्रप्रजापतिमिंद्रमग्निंसोममग्निंवायुंसूर्यमग्निंवं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि.प.
२३

रुणोसवितारंविष्णुंविश्वान्मरुतःस्वर्कान् वरुणादितिंप्र
जापतिं ऋताषाडृतधामानमग्निर्गंधर्वमोषधीरप्स
रसोमुदसंहितसमानंसूर्यंगंधर्वंमरीच्यप्सरसआयु
र्वस्तुषमणःसूर्यरश्मिंचंद्रमसंगंधर्वंनक्षत्राण्यप्सरसोभे
कुरीरिषिरंविश्वव्यचसंवातंगंधर्वमप्सरऊर्जोभुज्युसुप
र्णंयज्ञंगंधर्वंदक्षिणाप्सरसस्तावाप्रजापतिंविश्वकर्माणं
नक्तंगंधर्वमृक्सामाप्सरसएष्टीचित्तंमाकूतिंविज्ञातंवि
ज्ञातिंमनःशक्करीदर्शंपौर्णमासेबृहद्रथंतरंप्रजापतिंवि रामः २३
श्वभूतानामधिपतिमिंद्रंज्येष्ठानामधिपतिंयमंपृथिव्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नामध्धिपतिंवायुरंतरिक्षस्याधिपतिंसूर्य्यंदिवोधिपतिंचंद्रम
संनक्षत्राणामधिपतिंबृहस्पतिंब्रह्मणोऽधिपतिंमित्रंसत्याना
मधिपतिंवरुणमपामधिपतिंसमुद्रंश्रोतानामधिपतिंसोमंमौ
षधीनामधिपतिंसवितारंप्रसवानामधिपतिंविष्णुंपर्वतानाम
धिपतिंमरुतोगणानामधिपतिंपितॄन्पितामहान्परानव
रान्वरान्ततान् ततमुखानग्निमग्निंवैवस्वतंमृत्युंत्राज्ये
नाहंयक्ष्ये अथकन्यादेवताभिध्यानंकरोति अर्य्यमणमग्नि
मव्यापरमगमग्निंसर्वमणमग्निंभगंलाजैरहंयक्ष्ये ततोवरः
प्रजापतिंस्विष्टकृतंचाज्येनाहंयक्ष्ये इदमाज्यंश्रृततदेवता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

म्योमयापरित्यक्तं यथादैवतमस्तु ततएतंतेतिप्रतिष्ठा ॐ
वि.प. भूर्भुवःस्वःयोजकनामाग्नेसुप्रतिष्ठितोवरदोभव तद्देवाग्नि
२४ शितिचत्वारिंशृंगेतिमंत्राभ्यांध्यानावाहनपाद्यादिनीराजनां
तं पूजयित्वादक्षिणाजान्वाच ब्रह्मणान्वारब्धोमनसाप्रजा
पतिंध्यात्वा ॐप्रजापतयेस्वाहा इदंप्रजापतये ॐमिंद्राय
स्वाहा इदमिंद्राय ॐमग्नयेस्वाहा इदमग्नये ॐसोमा
यस्वाहा इदंसोमाय अथमहाव्याहृतिहोमः व्याहृतीनां
प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप छंदांसि अग्निवायु रामः
सूर्यादेवतासर्वप्रायश्चित्तहोमेविनियोगः ॐभूःस्वाहा २४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इदंभूः ॐभुवःस्वाहा इदंभुवः ॐस्वःस्वाहा इदंस्वः ॐ
त्वन्नोअग्नेवरुणस्यविद्वान् ० ॐसत्वन्नोअग्नइदमग्नि
वरुणाभ्यां अापश्चाग्न इदमग्नये येतेसतमितिशुनः
शेफऋषिस्त्रिष्टुप्छंदोवरुणसवितृविष्णुविश्वेदेवामरु
तःस्वर्कादेवताःसर्वप्रायश्चित्तहोमेविनियोगः ॐयेतेशतं
व० इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः
स्वर्केभ्यः उदुत्तममितिशुनःशेफऋषिस्त्रिष्टुप्छंदोव
रुणोदेवतासर्वप्रायश्चित्तहोमेविनियोगः उदुत्तमंवरुण
पाश० इदंवरुणायादित्यै दक्षिणासंकल्पः अद्येहामुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शर्म्मा सवधूकोहं सर्वप्रायश्चित्तहोमकर्म्मणः सङ्कल्प
विःपः २५ र्थमिमां दक्षिणामाचार्य्याय ब्रह्मणे च यथांशेन दास्ये
मंत्रपाठः उत्सर्गचतु.. रीयेच वरुणो विष्णुना सह तुष्टि
पुष्टि करो नित्यमुभयोः स्त्री कुमारयोः अथ राष्ट्रभृ[illegible]
मप्रयोगो यथा ऋताषाडिति प्रजापतिऋषिः यजुश्छं
दः ऋताषाडृत धामाग्निर्गन्धर्वो देवता होमे विनियोगः
ॐ ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु
तस्मै स्वाहा वाट् तुभ्यं इदमृताषाहे ऋतधाम्नेगन्धर्वा
य पुनः ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सर रामः २५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सोमुदोनामताभ्यःस्वाहा इदमोषधीभ्योप्सरोभ्योमुद्भ्यः स
ᳫंहितइतिप्रजापतिर्ऋषिर्यजुःछन्दःसᳫंहितोविश्वसा
मासूर्योगंधर्वोदेवताहोमेविनियोगः ओंसᳫंहितोविश्व
सामासूर्योगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्
ताभ्यः इदंसᳫंहितायविश्वसाम्नेसूर्यायगंधर्वाय पुनः
सᳫंहितइतिप्रजापतिर्ऋषिर्यजुःछन्दःमरीचयोप्सरस
श्चायुवोदेवताहोमेविनियोगः ओंसᳫंहितोविश्वसामा
सूर्योगंधर्वस्तस्यमरीचयोप्सरसश्चायुवोनामताभ्यःस्वाहा
इदंमरीचयोप्सरोभ्योश्चायुभ्यःदेवताहोमेविनियोगः ओंस

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰
२६

र्थं हितोविश्वसामासूर्य्योगंधर्वस्तस्यमरीचयोप्सरसआ
युवोनामताभ्यःस्वाहा इदंमरीचयोप्सरोभ्यआयुभ्यः सु
षुम्णास्व इतिप्रजापतिऋषिर्यजुःछंदःसुषुम्णोसूर्य्यर
स्मिश्चंद्रमागंधर्वोदेवताहोमेविनियोगः सुषुम्णोसूर्य्य
रश्मिश्चंद्रमागंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्
इदंसुषुम्णायसूर्य्यरश्मये चंद्रमसेगंधर्वाय: पुनःसुषु
म्णा इतिप्रजापतिऋषिर्यजुःछंदोनक्षत्राण्यप्सरसोभेकु
रयोदेवताहोमेविनियोगः ॐसुषुम्णासूर्य्यरश्मिश्चंद्र रामः २६
मागंधर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरयोनामताभ्यःस्वाहा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इदंनक्षत्रेभ्योप्सरोभ्योभेकुरीभ्यः इषिरइतिप्रजापतिर्ऋषि
र्यजुःछंदः इषिरविश्वव्यचावातोगंधर्वोदेवताहोमेविनि
योगः ॐ इषिरोविश्वव्यचावातोगंधर्वःसनः इदंब्रह्मक्षत्रं
पातुतस्मैस्वाहावाट्ताभ्य इदं इषिरायविश्वव्यचसेवाताय
गंधर्वाय पुनः इषिरइतिप्रजापतिर्ऋषिर्यजुःछंदस्तस्यापो
प्सरसऊर्जोदेवताहोमेविनियोगः ॐ इषिरोविश्वव्यचावा
तोगंधर्वस्तस्यापोप्सरऊर्जोदेवतानामताभ्यःस्वाहा इदं
चभ्योप्सरोभ्यःऊर्जेभ्यः भुज्युरितिप्रजापतिर्ऋषिःयजुः
छंदोभुज्युस्सुपर्णोयज्ञोगंधर्वोदेवताहोमेविनियोगः ॐभु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्युस्तुपर्णोयज्ञोगंधर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा
वि.प. वाट् इदं भुज्यवे सुपर्णाय यज्ञाय गंधर्वाय ॐ भुज्युः प्रजा
२७ पतिऋषिर्यजुः छंदो दक्षिणाप्सरसो देवता होमे विनियोगः
ॐ भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणाप्सरसस्तावाना
मताभ्यः स्वाहा इदं दक्षिणाप्सरोभ्यस्तावानामताभ्यः प्र
जापतिऋषिर्यजुः छंदः प्रजापति विश्वकर्मा मनो गंधर्वो दे
वता होमे विनियोगः ॐ प्रजापतिर्विश्वकर्मा मनो गंधर्वः
स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं प्रजापतये वि रामः
श्वकर्मणे मनसे गंधर्वाय ॐ प्रजापतिऋषिर्यजुः छंदः ३७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऋक्सामाणप्सरएष्टयोदेवताहोमेविनियोगः ॐप्रजा
पतिर्विश्वकर्मामनोगंधर्वस्तस्यऋक्सामाणप्सरएष्टयो
देवतानामताभ्यः इदंऋक्सामभ्योप्सरोभ्यएष्टिभ्यः
अवराष्ट्रभृज्जयाभ्यातांभ्यातानमंत्राणांहोमस्यप्रत्येकंफ
लविशेषोक्तेर्विशेषफलमीप्सुन्प्रत्येकदक्षिणांकुर्या
त इतिवदंति तच्छिष्टाचारतोवश्यकर्त्तव्याइतिसंप्रदाय
अथदक्षिणासंकल्पः अद्येहामुकशर्म्मासवधूकोहंकृ
तैतद्राष्ट्रभृद्धोमस्यसांगफलप्राप्तिसाद्गुण्यार्थमिमांद
क्षिणामाचार्यब्रह्मभ्यांयथांशेनदास्ये मंत्रपाठः गोविं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि॰प॰ दागोकुलस्यैवगोपीभिश्चहरेसहतुष्टिपुष्टिकरौनित्यमुभ
२८ योःस्त्रीकुमारयोः अथजयाहोमः चित्तंचेत्यादीनांत्रयो
दशमंत्राणांपरमेष्ठिऋषिर्यजुःछंदश्चित्तादयोदेवताःप्रति
मंत्रहोमेविनियोगः ॐचित्तंचस्वाहा इदंचित्ताय ॐचित्ति
श्चस्वाहा इदंचित्त्यै ॐआकूतंचस्वाहा इदमाकूताय ॐ
आकूतिस्वाहा इदमाकूत्यै ॐविज्ञातंचस्वाहाइदंविज्ञाता
य ॐविज्ञातिश्चस्वाहा इदंविज्ञात्यै ॐमनसेस्वाहा इदं
मनसे ॐशक्करीश्चस्वाहा इदंशक्कर्य्यै ॐदर्शंचस्वाहा राम॰
इदंदर्शाय ॐपौर्णमासंचस्वाहा इदंपौर्णमासाय ॐबृ २८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हैं स्वस्वाहा इदंबृहते ॐरथंतरेचस्वाहा इदंरथंतराय
ॐप्रजापतिजयतींद्रायप्रापइयुः पृतनाजयेषुतस्मैवि
शःसमनंतसर्वाःसऊग्रसहव्योवभूवस्वाहा इदंप्रजाप
तयेजयायइंद्राय उदकस्पर्शः अथापिदक्षिणा अद्येह
मुकशर्म्मासवधूकोहंचित्तादिहोमस्यसांगफलप्राप्तय
साद्गुण्यार्थइमांदक्षिणामाचार्य्यायब्रह्मणेयथांशेनद्दा
स्ये मंत्रपाठः चिरंजीवीमहातेजाश्विनाद्यास्यदिवौकसः
प्रयछंतुवरांवांछामुभयोःस्त्रीकुमारयोः २ अथाभ्याता
होम अग्नीर्भूतानामधिपतीत्यादीनोपितरःपितामहा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रि.प. २९ इत्येतानांसर्वेषांमंत्राणांप्रजापतिर्ऋषिस्त्रिष्टुप्छंदः मंत्रो
क्तादेवताः सर्वादेवताः प्रतिमंत्रेहोमेविनियोगः ॐअग्निर्भूता
नामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्य
स्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्यांस्वाहा इदमग्
ग्नयेभूतानामधिपतये ॐइंद्रोज्येष्ठानामधिपतिःसमाव
त्वस्मिन्ब्रह्मण्यस्मिन्० इदमिंद्रायज्येष्ठानामधिपतये ॐ
यमः पृथिव्यानामधिपतिःसमावत्वस्मिन्० इदंयमायपृथि
व्यानामधिपतये अत्रापितत्वादुदकस्पर्शः ॐवायुरंतरि रामः
क्षस्याधिपतिःसमावत्वस्मिन्० इदंवायवेंतरिक्षस्याधि २९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पतये ॐ सूर्य्यो दिवोधिपतिः समावत्वस्मिन्· इदं सूर्याय
दिवोधिपतये ॐ चंद्रमा नक्षत्राणामधिपतिः समावत्वस्मि
न्· इदं चंद्रमसे नक्षत्राणामधिपतये ॐ बृहस्पतये ब्रह्मणो
धिपतिः समावत्वस्मिन्· इदं बृहस्पतये ब्रह्मणोधिपतये
ॐ मित्रं सत्यानामधिपतिः समावत्वस्मिन्· इदं मित्राय सत्या
नामधिपतये ॐ वरुणोऽपामधिपतिः समावत्वस्मिन् इदं
वरुणायापामधिपतये ॐ समुद्रः स्रोत्यानामधिपतिः स
मावत्वस्मिन् इदं समुद्राय स्रोत्यानामधिपतये ॐ अन्नं
साम्राज्यानामधिपतिः समावत्वस्मिन्· इदमन्नाय साम्राज्या

Kirtikant Sharma Collection, Najafgarh

वि॰प॰ ३०

नामधिपतये ॐ सोमो ओषधीनामधिपतिः स मावत्वस्मि
न् इदं सोमायौषधीनामधिपतये ॐ सविता प्रसवानाम
धिपतिः स मावत्वस्मिन् इदं सवित्रे प्रसवानामधिपतये
ॐ रुद्रः पशूनामधिपतिः स मावत्वस्मिन् ~~इदं रुद्रे [illegible]~~
~~मधिपतिभ्य~~ इदं रुद्राय पशूनामधिपतये ॐ त्वष्टा रूपाणा
मधिपतिः स मावत्वस्मिन् इदं त्वष्ट्रे रूपाणामधिपतये ॐ वि
ष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् इदं विष्णवे पर्वताना
मधिपतये ॐ मरुतो गणानामधिपतिः स मावत्वस्मिन् इदं राम॰
मरुद्भ्यो गणानामधिपतिभ्यः ॐ पितरः पितामहाः परे तता ३०

CC-0. In Public Domain. Digitization by eGangotri
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्ततामहास्त इह समावत्वस्मिन् इदं पितृभ्यः पितामहेभ्यः
परेभ्योवरेभ्यस्ततभ्यस्ततामहेभ्यः अत्रप्रणीतोदकस्पर्शः अ
त्रा पिदक्षिणा अद्येहामुकशर्म्मासवधूकोहं कृतैतदग्न्याधान
होमस्यसांगफलप्राप्तिसाद्गुण्यार्थमिमांदक्षिणामाचार्य
ब्राह्मणेभ्यो यथांशेनदास्ये मंत्रपाठः उत्सर्गे चतुरीयचवरुणो
विष्णुनासह पुत्रांल्लक्ष्मीस्तथाकामानुभयोः स्त्रीकुमारयोः
अथाग्न्यादिपंचकहोमः अग्निरत्वित्यादिमंत्राणां चतुर्णां
प्रजापतिर्ऋषिस्त्रिष्टुप्छंदः अग्निर्देवताप्रतिमंत्रंहोमे
विनियोगः ॐ अग्निरेतुप्रथमो देवतानां सोस्यैप्रजामुंचंतु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि०प० ३०

मृत्युपाशान् तदयं राजावरुणोनुमन्यतांयथेयं स्त्री
मघवन्नरोदत्तस्वाहा इदमग्नये ओं इमामग्निस्त्रायतांगा
र्हपत्यः सोस्यैनयतुदीर्घमायुः अस्तून्योपस्थाजीवतामस्तु
स्तुमातापौत्रमानन्दमभिबुध्यतामियं स्वाहा इदमग्नये
ओंस्वस्तिनो अग्नेदिवापृथिव्यांनिधेह्ययथादहशयदस्याम
पिदिवियातं प्रजास्तंतदस्मसु द्रविणं धेहिचित्रं स्वाहा
इदमग्नये ओंसुगन्नुपंथाप्रदिशनएहिज्योतिष्मद्धेह्यजर
न अपेतुमृत्युरमृतंम आगाद्वैवस्वतोनोऽभयंकृणोतुस्वा रामः
हानोऽभयंकृणोतुस्वाहा इदमग्नयेवैवस्वताय अत्रापिशि ३०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ष्टाचाराद्ध्रुवस्त्रापतद्धोयमृतवेजुहोति परंमृत्युवीती
सवसुकंकऋषिः त्रिष्टुप्छन्दोमृत्युर्देवताहोमेविनियोगः
ॐ परंमृत्युरनुपरेहिपंथायस्तेस्वइतरोदेवयानात् चक्षु
पतेशृण्वतेतेब्रवीमिमानप्रजांशिरोषोमोतवीरान्स्मा
स्वाहा इदंमृत्यवे उदकस्पर्शः अत्रापिदक्षिणा अद्येहाऽमु
कशर्म्मासवधूकोहंकृतैतदग्न्यादिपंचकहोमकर्म्मणःसा
ङ्गुणार्थं इमांदक्षिणामाचार्य्यब्राह्मणाययथांशेनदास्ये मे
त्रपाठः गोविंदोगोकुलश्चैवगोपीभिश्चहरेप्रियः तुष्टिपुष्टि
करोनित्यमुभयोःस्त्रीकुमारयोः ततआचम्य अथपाणिग्रह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गोगम्भृतोलाजाहोमः अथकन्यायाकथनं आयुष्मानस्तु
वि.प. ३२ मेपतिरितिमंत्रलिंगात् कुमारीतिष्टत्यंजलिंविदधाति व
रस्तिष्टन्कुमार्य्यंजलिंगृहीत्वाकुमार्य्याभ्रातालौकिका
ग्निसिद्धान्लाजान्घृतेनाभिघार्य्य सूर्प्येचतुर्द्धाकृत्वा
संप्रोक्ष्यतेष्वेकभागंकुमार्य्यंजलावावपति साचतिष्टति
प्राङ्मुखीमंत्रंपठित्वाजुहुयात् अर्य्यमणमित्यथर्वणऋ
षिरनुष्टुप्छंदः अर्य्यमाग्निर्देवतालाजाहोमेविनियोगः
ॐ अर्य्यमणंदेवंकन्याअग्निमयक्षतसनोअर्य्यमादेवतायेत रामः ३२
मुंचतुमापतेःस्वाहा इदमर्य्यम्णोऽग्नयेइतीयंजुहो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ति इयंनारीत्यथर्वण ऋषिरनुष्टुप्छंदोऽर्य्यमाग्निर्देव
तालाजाहोमेविनियोगः ॐ इयंनार्य्युपब्रूतेलाजानावप
पयंतिका आयुष्मानस्तुमेपतिरेधतांज्ञातयोममस्वाहा इ
दमग्नये इमांल्लाजानामित्याथर्वणऋषिरनुष्टुप्छंदोऽर्य्य
माग्निर्देवतालाजाहोमेविनियोगः इमांल्लाजानावपाम्यग्नौ
समृद्धिकरणंतवममतुभ्यंवसंवदनंतदग्निरनुमन्यतामियं
स्वाहा इदमग्नये सर्वानजुहोति अथवरोवध्वादक्षि
णहस्तंसांगुष्ठंगृह्णाति गृभ्णामित्यादीनांचतुर्णांयाज्ञव
ल्क्यभारद्वाजाथर्वणाऋषयस्त्रिष्टुबनुष्टुप्यजुःछंदांसिभ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि.प.
३२

भगोअर्य्यमासविता पुरंध्रियो देवताकन्यायाः पाणिग्रहणोवि
नियोगः ॐ गृभ्णामिते सौभगत्वाय हस्तं मया पत्या जरद
ष्टि यथासतः भगोअर्य्यमः सविता पुरंध्रिर्मह्यंत्वादुर्गार्हपत्या
यदेवा ॐ अमोहमस्मि सात्वं सात्वमस्यमोहं सामाहमस्मि ऋक्
त्वं द्यौरहं पृथिवीत्वं तावेहि विवाहावहै सहरेतो दधावहै प्रजांप्र
जनयावहै पुत्रान्विन्दावहै बहून्ते सन्तु जरदष्टयः श
षविष्णुः सुमनस्यमानौ पश्येम शरदः शतं [illegible] जीवेम श
रदः शतं शृणुयाम शरदः शतम दीनाः स्याम शरदः शतं भू रामः
यश्च शरदः शतात् अथैनामश्मानमारोहयति ॐ आरोह ३२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ममता नमस्यै वतत्वथ्ठं स्थिराभव अभितिष्ठ पृतन्यतोऽवबा
धस्व पृतनायते आनूढायांव ध्वांतस्याः शिरसि दक्षिणहस्तं
नीत्वा गाथां गायति सारस्वतीति विश्वामित्र ऋषिरनुष्टुप्
छंदः सारस्वती देवता गाथागाने विनियोगः ओं सरस्वति प्रेद
मवसुभगवाजिनीवती यात्वो विश्वस्य भूतस्य प्रजायामस्या
ग्रतः यस्यां भूतथ्ठं समभवद्यस्यां विश्वमिदं जगत तामद्य
गाथां गास्यामि या स्त्रीणामुत्तमं यशः मंत्रपादो वरस्यैव अ
थ वधूवरौ दक्षिणामग्निं परिक्रामतः वर एव मंत्रं पठेत् तुभ्य
तुभ्यमग्न इत्यथर्वण ऋषिरनुष्टुप्छंदः अग्निर्देवता परिक्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मरोविनियोगः तुभ्यमग्नेपर्य्यवहान्सूर्य्यांवहंतुनासह
वि॰प॰ पुनः पतिभ्योजायांदह्यग्नेप्रजयासह इतिमंत्रंपठन्कुमा
३४ रीलाजान्वपंतीपरिक्रमणंकुर्यात् एवंपुनर्वारद्वयेला
जाहोमोऽश्मारोहणंगाथागानपरिक्रमणानिकृत्वा तृ
तीयापरिक्रमणानंतरंकुमारीभ्रातासूर्पकोणप्रदेशेनस
र्वान्लाजान्कुमारीहस्तेसाचतिष्ठति ॐभगायस्वाहा इ
दंभगाय इतिकृत्वा ततःसमाचारात्तूष्णींचतुर्थपरिक्रम
णंकृत्वा यथास्थानमागत्योपविश्य ब्रह्मान्वारब्धः ॐअ रामः
ग्नये प्रजापतयेस्वाहा इदमग्नये प्रजापतये इतिकृत्वा अ ३४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

थसप्तवर्त्तिकाप्रज्वाल्य एनामुदीचिं सप्तपदानिक्रामयति
ॐ एकमुखेविष्णुस्त्वानयतु ॐ द्वे ऊर्जे विष्णुस्त्वानयतु त्री
णिरायस्पोषायविष्णुस्त्वानयतु चत्वारिमायोभवायवि
ष्णुस्त्वानयतु पंचपशुभ्यांविष्णुस्त्वानयतु षड्ऋतुभ्योविष्णु
स्त्वानयतु सखेसप्तपदाभवसामामनुव्रताभवविष्णुस्त्वा
नयतु इतिमंत्रैः षट्वर्त्तिकानिर्वाप्य सप्तमीवर्त्तिकाज्वलंति
मेवस्थापयंतीवधूः ततोनिष्क्रमणप्रभृत्युदकुंभमादायउ
त्तरतःस्थितोब्राह्मणस्तस्यहस्तस्थंहस्ताज्जलपात्रमादाय
तेनजलेनवरोमूर्द्धन्यभिषिंचति आपइतिप्रजापतिऋषिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिष्ठाछंदः आपोदेवतामूर्द्धाभिषेके विनियोगः आपःशि
वाःशिवतमाः शांताः शान्ततमास्ताः यामवचेनस्वकुलवृद्धा
स्त्रियश्चकथ्यंते तेहंएवनिभेषजं ॐ आपोहिष्ठामयोभु
वस्तानऊर्जेदधातुनः महेरणायचक्षसे योवःशिवतमोर
सस्तस्यभाजयतेहनः उशतीरिवमातरः तस्माअरंगमामवो
यस्यक्षयायजिन्वथः आपोजनयथाचनः ततःसूर्य्यमुदी
क्षस्वेतिप्रेषितावधूः सूर्य्यमुदीक्षयति ॐ तच्चक्षुर्देवहितंपु
रस्ताच्छुक्रमुच्चरत् पश्येमशरदःशतंजीवेमशरदःशतं श्रृ
णुयामशरदःशतंप्रब्रुवामःशरदःशतमदीनाःस्यामःश

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रदः शतम्भूयश्चशरदश्शतात् अथवरोवध्वादक्षिणांशस्योपरि
हस्तंनीत्वाहृदयमालभ्यते ममव्रतेइतिप्रजापतिऋषिस्त्रि
ष्टुप्छंदःप्रजापतिर्देवतावध्वाहृदयालंभनेविनियोगः ॐम
मव्रतेतेहृदयेद[illegible]धामिममचित्तमनुचित्तंतेस्तु ममवाच
मेकमनाजुषस्वप्रजापतिर्द्वस्त्वानियुनक्तुमह्यं अथैनाम
भिमंत्रयते सुमंगलीरितिप्रजापतिऋषिर्यजुःछंदःवधूर्देव
ताअभिमंत्रणेविनियोगः ॐसुमंगलीरियंवधूरिमांसमेत
पश्यतसौभाग्यमस्यैदत्वायथास्तंविपरेतन इतिमंत्रेणसोम
तसिंदूरमपिदापयेति वृद्धाः अथशिष्टाचाराद्वरस्यवामभागे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वधूस्तपश्चेशयंसावधूर्वरस्यांचलंप्रगृह्ययथास्थानंनिवेशय
वि॰प॰ ३६ ति अथाग्नेःपश्चात उदग्वाऽऽनडुहेचर्म्मणिरक्तवस्त्रखंडेवा
कश्चित्पुरुषःवधूस्तथाप्युपवेशयति मंत्रः इहगावोइ
तिप्रजापतिर्ऋषिस्त्रिष्टुप्छंदोलिंगोक्तादेवतावधाउपवेश
नेविनियोगः ॐइहगावोनिषीदन्त्विहा इहपुरुषा इहसहस्र
दक्षिणा इहपुरुषानिषीदन्तु ततोयथास्थानमुपवेशपश्चा
मवचनंकुर्य्यात ग्रामवचनेन स्वकुलवृद्धास्त्रियश्च
यंते वधूहस्तेन वरस्यपादप्रक्षालनं वरवध्वोःपरस्परातिल रामः
कं इत्यादिनांसहदधिगुडप्राशनं परस्परोच्छिष्टलापनंय ३६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

था देशकुलाचारं वा कुर्य्यात् विवाहश्मशानयोर्ग्रामवचन
प्रमाणमिति श्रुतेः ततश्चाचम्य ब्रह्मन्वारब्धः ॐ अग्नये स्वि
ष्टकृते स्वाहा इदमग्नये स्विष्टकृते ततः संस्रवप्राशनं पवित्र
प्रतिपत्तिः प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानं संकल्पः
अद्येहामुकशर्म्मा सवधूकोहं विवाहहोमकर्म्मणः सांगफ
लप्राप्तये ऽ पूर्णपूर्णार्थं इदं पूर्णपात्रं सद्रव्यं ब्रह्मणे तुभ्यं संप्र
ददे मंत्रपाठः अकन्नकर्मकृते ततः अत्र वरः स्वाचार्य्याय वरं द
दाति गौर्ब्राह्मणस्य वरः ग्रामो राजन्यस्य अश्वो वैश्यस्येति सू
त्रे तत्र संकल्पः अद्येहेत्यादि अमुकशर्म्मा सवधूकोहं विवाह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वि.प.
३७

होमकर्मणः सांगफलप्राप्तये साद्गुण्यार्थमिमां दक्षिणां ना
नागोत्रेभ्यो नटकर्त्तकगायकेभ्योदीनानाथेभ्यश्च विभज्यदास्ये
तत्सन्नमम इति संकल्प्य आचार्य्यादिभ्योऽन्येभ्योब्राह्मणेभ्यश्च
दक्षिणां दत्वा अभिषेकतिलकमंत्रापाठादि कृत्वा अथवधूर्ध्रु
वंपश्येत दिवाचेदस्तमितसूर्य्ये रात्रौवरदानानंतरं ध्रुवमुदीक्षेत
तत्रमंत्रः ॐध्रुवमसीतिप्रजापतिऋषिः पंक्तिश्छंदो ध्रुवोदेवता
ध्रुवोदीक्षणेविनियोगः ॐध्रुवमसि ध्रुवंत्वयस्या ध्रुवोधिपोष्या
महंत्वादाद्बृहस्पतिः मयापत्याप्रजापतिः संजीवशरदः शतमिति
मंत्रेणपश्येत सायदिनपश्यामीतिब्रूयात अथात्रिरात्रनियम रामः ३७

पश्या

CC-0. In Public Domain. Digitization by eGangotri

मा: त्रिरात्रमक्षारालवणाेस्यातां अधःशायीयातांसंवत्सरं द्वि
रात्रंषट्रात्रंषड्रात्रंवामैथुनंनकुर्यात् इतिशिक्षा ततःपंच
वाद्यपूर्वकंशालातोभ्यंतरेगत्वा जीवमातृपूजनंकुर्यात्
आचम्य अर्घ्यंसंस्थाप्य पूजासंकल्पः अद्येहामुकश
र्म्माःसवधूकोहंविवाहकर्म्मणुत्तरांगत्वेनसर्वाभ्युदयप्राप्तये
लिखितानांकल्याण्यादिजीवमातृणांपूजनंकरिष्ये एतंतेइ
तिप्रतिष्ठा ॐभूर्भुवःस्वःकल्याण्यादीसप्तजीवमातरःसुप्रति
ष्ठितावरदाभवंतु ध्यानं कल्याणीमंगलाभद्रापुण्यापुण्यमु
खीतथा जयाचविजयाचैवसप्तैताजीवमातरः इतिध्यात्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाममंत्रेणपूजनं ॐ कल्याण्यैनमः ॐ मंगलायैनमः ॐ भ
द्रायैनमः ॐ पुण्यायैनमः ॐ पुण्यमुख्यैनमः जयायैनमः
विजयायैनमः इतिनाममंत्रेणपाद्यादिनीराजनांतंसंपूज्य
वसोः पवित्रमसीतिवसोर्धाराःपातयित्वा पुष्पांजलिंसमर्प्य
दक्षिणांचदत्वा महानीराजनंचकृत्वा भोजनंविधाय श्व
श्रूश्वशुरयोःपादाभभिवंद्य वधूंशिविकादियानेनवाहयि
त्वा स्वगृहमागच्छन् स्वगृहमागत्यवरः स्वमातरंप्रणमेत्
वरमाताचादयःशिविकादियानादवरुह्यतार्घ्यं वधूस्वहस्ता
श्वश्रूपादयोःप्रणिपत्यतत्पादतलेधृत्वा चाशिभिर्वर्धयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभिवंद्य गृहप्रवेशं कुर्य्यात् तत्रपूर्वे द्वारदेशे द्वारमातृपूजनं
विधाय लग्नदानं कुर्य्यात् तत्रसंकल्पः अद्येहेत्यादि अ
मुकशर्म्मा सवधूकोहं अस्यावध्वाः पितृगृहात्स्वगृहप्रवे
शस्यगृहप्रवेशलग्नाद्यत्रकुत्रस्थितादित्यादिनवग्रहाणां
दुष्टानां दुष्टफलोपशांत्यर्थं शुभफलप्राप्तये आदित्यादि
नवग्रहाणां प्रीतये इमां दक्षिणां ब्राह्मणेभ्यो दास्ये इतिदक्षि
णांदत्वा अभ्यंतरेगत्वा जीवमातृपूजनं कुर्य्यात् आचम्या
र्घ्यं स्थाप्य अद्येहामुकशर्म्मा सवधूकोहं विवाहकर्म्मण
उत्तरांगत्वेन स्वगृहप्रवेशकर्म्मणि सर्वाभ्युदयप्राप्तयेमिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कि.प. ३९

लिखितानांकल्याणपादिजीवमातृणांपूजनंकारयेत् एतै
तेतिप्रतिष्ठाप्य कल्याणीमंगलाभद्रेतिमंत्रेणाध्यानावाहन
पाद्यादिनीराजनांतंसंपूज्य वसोर्धारांपातयित्वा पुष्पांजलिं
समर्प्य दक्षिणांसंकल्प्यब्राह्मणेभ्योदत्वा अभिषेकतिलक
मंत्रपाठादिकृत्वा ततोमातृश्वश्र्वादयोमहानीराजनंचकुर्य्या
त् वरवधूभ्यांदधिगुडप्राशनंकृत्वा यथासुखंविहरेतः इति
विवाहपद्धतिःसमाप्ता शुभम् सं १९३७ वैशाख ५ गतेगुरुवारे रामः ३९
लिखितंश्रीमपतीसर्म्मणः पठनार्थंलक्ष्मीरामशर्म्मणः शुभं

दुर्गादत्त शर्मा, ज्योतिषाचार्य, ग्राम बचाना, पो.ऑ. कुंडली
दुर्गादत्त शर्मा, ज्योतिषाचार्य, ग्राम बचाना, पो.ऑ. कुंडली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh